# Shri Jangidevacharyapranitam Shrimithilamangalam

# શ્રીજઙ્ગિદેવાચાર્યપ્રણીતં શ્રીમિથિલામઙ્ગલં

## Document Information

Text title : Shri Jangidevacharyapranitam Shrimithilamangalam

File name : mithilAmangalaMjangidevAchArya.itx

Category : raama, rAmAnanda, mangala, aShTaka

Location : doc_raama

Author : jaNgidevAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીજઙ્ગિદેવાચાર્યપ્રણીતં શ્રીમિથિલામઙ્ગલં

રામં ચ ભાષ્યકૃદ્રામાનન્દાચાર્યં ચ મારુતિમ્ ।
કુર્વે નત્વાઽગ્રદેવાચાર્યં મિથિલામઙ્ગલમં શુભમ્ ॥ ૧॥

સુધાતુલ્યજલૈર્યુક્તા યત્ર સરઃસરિદ્વરાઃ ।
તસ્યૈ સરઃ સરિદ્વત્યૈ મિથિલાયૈ સુમઙ્ગલમ્ ॥ ૨॥

યત્રોદ્યાનાનિ શોભન્તે વૃક્ષૈઃ સફલપુષ્પકૈઃ ।
તસ્યૈ ચોદ્યાનયુક્તાયૈ મિથિલાયૈ સુમઙ્ગલમ્ ॥ ૩॥

યત્ર દાર્શનિકા જાતા શ્રીમદ્બોધાયનાદયઃ ।
તસ્યૈ વિદ્વદ્વિશિષ્ટાયૈ મિથિલાયૈ સુમઙ્ગલમ્ ॥ ૪॥

યસ્યાં પુર્યામુદૂઢા ચ રામેણ જનકાત્મજા ।
તસ્યૈ મહોત્સવાઢ્યાયૈ મિથિલાયૈ સુમઙ્ગલમ્ ॥ ૫॥

સીતારામપદસ્પર્શાત્ પુણ્યશીલા ચ યત્ક્ષિતિઃ ।
તસ્યૈ પાપાપહારિણ્યૈ મિથિલાયૈ સુમઙ્ગલમ્ ॥ ૬॥

જાનકીજન્મભૂમિર્યા ભક્તિદા મુક્તિદા તથા ।
તસ્યૈ મહાપ્રભાવાયૈ મિથિલાયૈ સુમઙ્ગલમ્ ॥ ૭॥

દ્વારપીઠાર્યશ્રી જઙ્ગિદેવાચાર્યવિનિર્મિતમ્ ।
પઠતાં મઙ્ગલં કુર્યાન્મિથિલામઙ્ગલં શુભમ્ ॥ ૮॥

ઇતિ શ્રીજઙ્ગિદેવાચાર્યપ્રણીતં શ્રીમિથિલામઙ્ગલં સમ્પૂર્ણમ્ ।

Encoded and proofread by Mrityunjay Pandey

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*